* पुराणनिर्माणाधिकरणम् *


समीक्षाचक्रवर्ति :
स्व० पं० श्रीमधुसूदनशर्म्ममैथिलः

राजस्थान पत्रिका
संशोधित मूल्य... ₹७/-
प्रकाशन, जयपुर

॥ श्रीः ॥

पुराणनिर्माणाधिकरणम्





समीक्षाचक्रवर्त्तिः—

स्व० पं० श्रीमधुसूदनशर्म्ममैथिलाः ।

* श्रीः *

समीक्षाचक्रवर्ति—विद्यावाचस्पति—महामहोपदेशक

विद्वद्वर्य स्व० पं० श्रीमधुसूदन ओझाजी

विरचितम् ।

—:०:—

* पुराणनिर्माणाधिकरणम् *

तदिदं

ग्रन्थकर्तृ पौत्रेण श्रीपद्मलोचनशर्मणा

सम्पादितम् ।

अलवरराज्य लब्धप्रतिष्ठ, सामन्त, राजमिश्र—

पं०श्रीयोगेशचन्द्रजी कर्मठरत्न, काव्यतीर्थ, महोदय निजद्रव्येण

प्रकाशितम् ।

प्रथमावृत्तिः ५००

विक्रम सम्वत् २००६

Rs 50·10

सर्वेधिकाराः सम्पादकाधीनाः ।

भूमिका



भारतवर्षीय आर्यजनता की आज भी पुराणों पर बहुत बड़ी श्रद्धा है, आस्तिक वर्ग वेद के समान ही पुराणों का भी आदर करता है, प्रत्युत वेद के अधिकारी तो आज देश में बहुत इने गिने हैं किन्तु पुराण आज भी महानगरों से लेकर ग्राम्य-जनता तक में पढ़े और सुने जाते हैं एवं इनके द्वारा ही भारतीय सभ्यता और संस्कृति का ज्ञान साधारण जनता को भी होता है। इतना सब होते हुये भी जो पुराण ग्रन्थ आज हमें उपलब्ध हैं इनका विकास किस क्रम से हुआ, इनका मूल कहाँ से है, प्रथम वक्ता कौन है और वर्तमान पुराण-ग्रन्थ किस की कृति हैं इत्यादि बातों का ज्ञान न वक्ताओं को है न श्रोताओं को, इससे शिक्षित समाज के मन में जो बहुतसी शङ्कायें होती हैं उनका ठीक ठीक समाधान नहीं हो पाता और इसे वे ग्रन्थों की ही त्रुटि समझ कर समाज में नाना तर्क कुतर्क फैलाते हैं इसलिये इस विषय का एक छोटा सा ग्रन्थ जो पूज्य पिताजी ने नोट के रूप में लिखा था उसका भी प्रकाशन आवश्यक समझ कर आज इस छोटे से ग्रन्थ का भी प्रकाशन करना उचित जान पड़ा है। इस सम्बन्ध में एक "पुराणोत्पत्ति-प्रसङ्ग" नाम का निबन्ध पूर्व प्रकाशित किया जा चुका है किन्तु वह कुछ रहस्यमय गूढ़ और सङ्क्षिप्त है। इस छोटे से ग्रन्थ में उक्त विषयों का बहुत विस्पष्ट और विस्तृत वर्णन पुराणों के ही आधार पर किया गया है। इस ग्रन्थ की भी पूरी प्रति पूज्य पिताजी के सग्रह में प्राप्त नहीं हो सकी इसलिये जितना कुछ प्राप्त हुआ वही प्रकाशित कर अपना कर्त्तव्य पालन किया जासकता है इसके अतिरिक्त और कोई उपाय नहीं।

पुराण सम्बन्ध में पूज्य पिताजी के बताये बहुत से ग्रन्थ अभी अमुद्रित ही हैं उनके भी क्रमशः प्रकाशन का प्रयत्न किया जारहा है, संभव है यह विषय उन ग्रन्थों में प्राप्त हो सके और जिज्ञासु जनों की पिपासा शान्त हो सके।

इस ग्रन्थ के मुद्रित कराने का श्रेय राजमिश्र पं० श्रीयोगेशचन्द्रजी महोदय को है। आप अलवर राज्य के प्रथम कक्षा के सामन्तों में हैं, राज्य की ओर से आपको अच्छी जीविका

मिली हुई है और वहाँ दरबार में आपका मुख्य स्थान (सीट) नियुक्त है। श्रीमान् महाराज अलवर के सभी धार्म्मिक कार्यों में आप आचार्यरूप से कार्य करते हैं। आपका स्वभाव बड़ा सरल है, शील तथा सौजन्य के तो आप मानो मूर्ति हैं। आपको बहुत विद्यानुराग है और ये बड़े ही उदार प्रकृति के व्यक्ति हैं। आपको अपने व्यक्तित्व का बड़ा विचार रहता है। राजमिश्रजी महोदय की मुझपर बड़ी कृपा है और इनका हमारा वर्षों से एक रूप यथावत् स्नेह सद्भाव चला आरहा है। आपने जो हमारे ग्रन्थ प्रकाशन कार्य में इस ग्रन्थ को मुद्रित कराकर हमारा हाथ बँटाया है तत्प्रयुक्त मैं आपका बडा कृतज्ञ हूँ। ईश्वर आपको सपरिवार चिरायु तथा सुखी रखें यही हमारी शुभकामना है।

पं० प्रद्युम्नशर्म्माओझा।

जयपुर।
ता० ११-६-५२ ई०, वि० सं० २००६



वेदविद्यासमुद्धारक स्वर्गीय पण्डित श्रीमधुसूदनशर्म्म मैथिलाः ।

॥ श्रीः ॥

अथ पुराणसमीक्षायां पुराणसाहित्याधिकारः ।

* पुराणनिर्माणाधिकरणम् *



अथैतत्कतिपयमन्त्रब्राह्मणग्रन्थाविर्भावकालादपि पूर्वं तत्समकालमेव वा आसीदेको ब्राह्मण्डपुराणाख्यो वेदविशेषः सृष्टि प्रतिसृष्टि निरूपणात्मा "इदं वा अग्रे नैव किञ्चिदासीदित्यादिनोपक्रान्त इति विज्ञायते । तत्परतया च "ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानीति" शतपथब्राह्मणादिवचनान्तर्गत पुराणपदमुपनीयते । तस्य च पुरावृतपरम्पराख्यानात्मकतया ब्रह्माण्डसृष्टिविचारात्मकतया च ब्राह्मण्डपुराणसंज्ञा । तदुक्तं मात्स्ये-मत्स्य उवाच ॥

पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥ १ ॥
पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघ ।
त्रिवर्गं साधनं पुण्यं शतकोटि प्रविस्तरम् । २ ॥
कालेनाग्रहणं दृष्ट्वा पुराणस्य ततो नृप ।
तदष्टादशधा कृत्वा भूर्लोकेऽस्मिन् प्रकाश्यते ॥ ३ ॥

तथा च पाद्मे—"पुरापरंपरां वक्ति पुराणं तेन वै स्मृतमिति" । उक्तं च बृहन्नारदीयेऽपि-"ब्रह्माण्डं च चतुर्लक्षं पुराणत्वेन पठ्यते, तदेव व्यस्य गदितमष्टादशधा पृथक् १ पाराशर्य्येण मुनिना सर्वागमपि मानद, वस्तु द्रष्टार्थं तेनैव मुनीनां भावितात्मनाम् २ मत्तः श्रुत्वा पुराणानि लोकेभ्यः प्रचकाशिरे" इति तदेतत्ब्रह्मवाक्येन पूर्वं प्रसिद्धपुराणग्रन्थावलम्बेनैव पश्चादष्टादशपुराणानामुत्पत्तिः प्राप्यते । तत्रापि तावद् तस्मादेवादिमाद्ब्रह्माण्डपुराणग्रन्थान्मन्त्रार्थोपयुक्तानि तत्तदाधिभौतिकाधिदैविकाध्यात्मिकोपाख्यानसहितानि पुराणजातानि सम्यगवधाय महर्षिभिस्तत्तद्ब्राह्मणग्रन्थेषु तत्र तत्र यथोपयोगं तानि तान्याख्यानान्याख्यायन्ते स्म । तदिदं प्रायेणैव च—

सौमो वै राजाऽमुष्मिन् लोके आसीदतं देवाश्च
ऋषयश्चाभ्यध्यायन्-कथमयमस्मान् सोमोराजा
गच्छेदिति, तेऽब्रुवन् छन्दांसि श्रूयं न इमं सोमं
राजानमाहरतेति, तथेति, ते सुपर्णा भूत्वोदपतन्
तेयत्सुपर्णा भूत्वोदपतन् तदेतत् सौपर्णमिति
आख्यानविद आचक्षते ।

इत्येवमैतरेयकब्राह्मणादौ सिद्धानामेवाख्यानानां एव वक्तारः प्रतिपाद्यन्ते । तत्र ब्राह्मणेषु यद्यपि महर्षिभिरेवाख्यातान्याख्यानानि, अथापि नैतानि ब्राह्मणग्रन्थकर्तृ महर्षि-कल्पनि विज्ञायन्ते । मन्त्रस्मारितप्रयोगसमवेतार्थोपपादनोपयुक्त्या तदुपादानात्तेषां मन्त्र-चनोत्तरकालिककल्पना विषयत्वा संभवात् तस्मात् चिरन्तनाद ब्रह्माणपुराणाद् ब्रह्मणा प्रस्तुता-देवतानि संकलितानीत्यभिमानेन ब्राह्मणोल्लिखितानामपि पुराणार्थानां ब्रह्मकृतत्वमभिप्रेत्य—

सूतेनानुक्रमेणेदं पुराणं सं प्रकाशितम् ।
ब्राह्मणेषु पुरायच्च ब्रह्मणोक्तं सविस्तरम् ॥

इत्युक्तं पाद्मे सृष्टिखण्डे पुराणावतारे । अन्येतु ब्राह्मणग्रन्थकर्तुस्तस्य तस्यमहर्षेः सार्व-विद्यऋत्विक्त्वाभिमानेन ब्राह्मणोल्लिखितार्थानां ब्रह्मप्रोक्तत्वमाख्यायते इत्याचक्षते ।

अथैतेषु ब्राह्मणग्रन्थेषु सूत्रपातात्मना प्रायेण सर्वासामेव विद्यानामुल्लेखसत्त्वेपि वैशद्येन सजातीयसमुच्चय क्रमबन्धेन पार्थक्येन चानुल्लेखात् स्पष्टमप्रतीते शिक्षाक्लेशमनुलक्ष्य विधेयानु ग्रहार्थं पश्चात् काले काले विशिष्टबुद्धयो महर्षयस्तेभ्यो ब्राह्मग्रन्थेभ्यो यथा प्रतिभासमुत्कर्षं तां तां विद्यां पृथुकृत्य युक्तिप्रयुक्तिसंसाधनसमुपबृंहितरूपेण विशदीकृत्य प्रवर्तयामासुः तत्र यथा कपिलपतञ्जल्यादयः सांख्ययोगप्रवचनम् वात्स्यायनादयः कामसूत्रः मन्वादयो धर्म्मसूत्रम् धन्वन्तरि चरकादय आयुर्वेद शाकपूण्ये यास्कोदयोनिरुक्तम् इन्द्रपाणिन्यादयो व्याकरणं प्रवर्तयां चक्रिरे तथैव वसिष्ट प्रपौत्रः शक्तिपौत्रः पराशरपुत्रः सत्यवती गर्भजातो भगवान् कृष्णद्वैपायनो लोकोपकारार्थं सर्वेभ्यो ब्राह्मणग्रन्थेभ्यः सर्वाण्युपाख्यानानि संकल-र्य्यच प्रतीता ब्राह्मणव्युल्लिखिताश्च तास्ता गाथाः सङ्गह्य कथाप्रसङ्गसङ्गताः कल्पशुद्धीश्च यथायथ-मनुबध्य सर्वाण्येतानि लौकिकाख्यानविमिश्रितानि सङ्गतिबद्धानि कृत्वा पूर्व निर्दिष्टवेदरूप ब्रह्माण्डपुराणोक्तपदार्थं जगत्सर्गप्रतिसर्गात्मकं तदेतदाख्यानोपाख्यान् गाथाकल्पशुद्धा-त्मकविषयचतुष्टये नोपगुम्फ्याष्टादशधा परिच्छिद्य रूपान्तरसस्कृता मेकां पुराण संहिता-

चक्रे तत्र पुराणपदव्यपदिष्टानां विश्वसृष्टिविद्यानां ब्राह्मणाद्युल्लिखितानां संग्रहेणैकत्र समुच्चयकरणात् पुराणसंहितापदव्यपदेशः तां च पुनः स्वशिष्याय सूतजाताय लोमहर्षणाय पाठयामास स चायं लोमहर्षणोऽपि तदधिगतसर्वोपाख्यानः सर्ग—प्रतिसर्ग वंश वंश्यचरित मन्वन्तरात्मकत्रिषयपञ्चकेन परिच्छिद्यापरामेकां संहितां लौमहर्षणीं नाम प्रस्तावितवान् तां च पुनः षड्भ्यः स्वशिष्येभ्यो ददौ ते यथा सुमति—१ अग्निवर्चाः—२ मित्रयुः—३ सुशर्मा—४ अकृतव्रणः—५ सोमदत्तिः। एत एव गोत्रनाम्ना क्रमेण १-आत्रेयः २-भारद्वाजः ३-वसिष्ठः ४-शांशपायनः ५-काश्यपः ६-सावर्णिः इत्याख्यायन्ते। त एते षडपि पुनस्तस्या लौमहर्षण्या मूलसंहिताया आदि संहितायाश्च वा दरायण्या आधारेण स्वस्वेच्छाक्रमनिबद्धाः षट् संहितास्वयामासुः तासु च जिज्ञासाख्यानसंवादप्रवृत्त्यनुरोधिप्रसङ्गसम्पतितसंक्षिप्त विस्तरानेक विभिन्नकथानकोपेतत्वाद्विभिन्नाकारास्वपि सर्ग प्रतिसर्गादयः सामान्या धर्म्मा सर्वासु तदितरैस्तु तैस्तैर्विशेषैः साधर्म्यं च वैधर्म्यं चान्यासामन्यासाम् तदित्थं साकल्पेनाष्टौ संहिता जाताः इति केचित् वायुपुराण विष्णुपुराणयोस्तु चतस्रएव संहिता उच्यन्ते लोमहर्षणिका काश्यपिका सावर्णिका शांशपायनिका चेति एतत्संहिता चतुष्टयाधारेणैव ब्रह्मपुराणादीभ्यऽष्टादशपुराणप्रकरणादि वेदव्यास कल्पितानीदानीं प्रसिद्धाष्टादश निबन्धरूपैरुग्रश्रवः प्रभृतिसूतसमुपबृंहितानि समपद्यन्त।

तथा च विष्णु पुराणम्—

पराशर उवाच।

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।
पुराणसंहितां चक्रे पुराणार्थ विशारदः॥ १॥
प्रख्यातो व्यासशिष्योऽभूत् सूतौ वै रोमहर्षणः।
पुराणसंहितां तस्मै ददौ व्यासो महामुनिः॥ २॥
[१]सुमतिश्चाग्नि[२]वर्चश्च मित्रायु[३]: शांश[४]पायनः।
अकृत[५]व्रणोऽथ साव[६]र्णिः षट् शिष्यास्तस्य चाभवत्॥ ३॥
[५]कश्यपः संहिताकर्त्ता साव[६]र्णिः शांश[४]पायनः।
लौमहर्षणिका चान्या तिसृणां मूलसंहिता॥ ४॥
चतुष्टयेनाप्येतेन संहितानामिदं मुने।
आद्यं सर्व पुराणानां पुराणं ब्राह्ममुच्यते॥ ५॥

अष्टादश पुराणानि पुराणज्ञाः प्रचक्षते ।
ब्राह्मं पाद्मं वैष्णवं च शैवं भागवतं तथा ॥ ६ ॥
आथान्यन्नारदीयं च मार्कण्डेय तु सप्तमम् ।
आग्नेयमष्टमं तद्वद्भविष्यं नवमं तथा ॥ ७ ॥
दशमं ब्रह्म वैवर्तं लैङ्गमेकादशं स्मृतम् ।
वाराहं द्वादशां चैव स्कान्दं चात्रयोदशम् ॥ ८ ॥
चातुर्दशं वामनं च कौर्मं पञ्चदशं स्मृतम् ।
मात्स्यं च गारुडं चैव ब्रह्माणं च ततः परम् ॥ ९ ॥
सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
सर्वेष्वेतेषु कथ्यन्ते वंशानुचरितं चयम् ॥ १० ॥
यदेतत् तव मैत्रेयं पुराणं कथ्यते मया ।
एतद्वैष्णवसंज्ञं वै पाद्मस्य समनन्तरम् ॥ ११ ॥
सर्गे च प्रतिसर्गे च वंशमन्वन्तरादिषु ।
कथ्यते भगवान् विष्णुरशेषेष्वेव सत्तम ॥ १२ ॥

वायु पुराणेऽपि—

लोमहर्षण उवाच ।

षट्शः कृत्वा मयाप्युक्तं पुराणमृषिसत्तमाः ।
आत्रेयः सुमतिर्धीमान् काश्यपोऽकृतव्रणः ॥ १ ॥
भारद्वाजोऽग्निवर्चाश्च वसिष्ठो मित्रयुश्चयः ।
सावर्णिः सोमदत्तिस्तु सुशर्मा शांशपायनः ॥ २ ॥
एते शिष्या मम ब्रह्मन् पुराणेषु दृढ व्रताः ।
त्रिभिस्तत्र कृतास्तिस्रः संहिताः पुनरेव हि ॥ ३ ॥
काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ।
मामिका च चतुर्थी स्यात् सा चैषा पूर्वसंहिता ॥ ४ ॥

सर्वास्ता हि चतुष्पादाः सर्वाश्चैकार्थ वाचिकाः ।
पाठान्तरै पृथग्भूता वेदशाखा यथा तथा ॥ ५ ॥

चतुः साहस्रिकाः सर्वाः शांशपायनिकामृते ।
लोमहर्षणिकामूलास्ततः काश्यपिकाः पराः ॥ ६ ॥

सावर्णिका स्तृतीयास्ता यजुर्वाक्यार्थपण्डिताः ।
शांशपायनिकाश्चान्या नोदनार्थ विभूषिताः ॥ ७ ॥

तदित्थं वेदव्यास कृतानां होतृद्गात्रध्वर्य्यथर्वणिकर्मानुरोधिनीनां चतसृणां याज्ञियकर्म-सहितानां पैल जैमिनि वैशम्पायन पैलात्मक शिष्य प्रशिष्य प्रणालीभेदेन यथा काले कालेऽनेकाःशाखाः समभूवन् तथैव वेदव्यासकृताया: स्त्रीशूद्रद्विजबन्ध्वादि सामान्य विधेयानुरोधिन्या एकस्याः पुराणसंहितायाः अपि लोमहर्षणात्मक शिष्य प्रशिष्य प्रणाली भेदेन संहिता-चतुष्टयीद्वारा क्रमशः इदानीं प्रसिद्धान्यष्टादश निबन्धजातानि विभिन्नाकाराणि प्रासिद्ध्यन्त तथा चोक्तं कौर्मेऽपि—

पराशरसुतो व्यासः कृष्णद्वैपायनोऽभवत् ।
स एव सर्ववेदानां पुराणानां प्रदर्शकः ॥ १ ॥
अथ शिष्यान् स जग्राह चतुरो वेद पारगान् ।
जैमिनिं च सुमन्तुं च वैशम्पायनमेव च ॥ २ ॥
पैलं तेषां चतुर्थं च पञ्चमं मां महामुनिः ।
ऋग्वेद पाठकं पैलं जग्राह स महामुनिः ॥ ३ ॥
यजुर्वेद प्रवक्तारं वैशम्पायनमेव च ।
जैमिनिं सामवेदस्य पाठकं सोऽन्वपद्यत ॥ ४ ॥
तथैवाथर्ववेदस्य सुमन्तुमृषिसत्तमम् ।
इतिहासपुराणानि प्रवक्तुं मामयोजयत् ॥ ५ ॥
एक आसीद यजुर्वेदस्तं चतुर्द्धा व्यकल्पयत् ।
चातुर्होत्रमभूत्तस्मिंस्तेन यज्ञमथाकरोत् ॥ ६ ॥

आध्वर्य्यवं यजुर्भिः स्यादग्निहोत्रं द्विजोत्तमाः ।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥ ७ ॥
ततः सत्रे च उद्धृत्य ऋग्वेदं कृतवान् प्रभुः ।
यजूँषि च यजुर्वेदं सामवेदं तु सामभिः ॥ ८ ॥
एकविंशतिभेदेन ऋग्वेदं कृतवान् पुरा ।
शाखानां तु शतेनैव यजुर्वेदमथाकरोत् ॥ ९ ॥
सामवेदं सहस्रेण शाखानां प्रविभेद सः ।
अथर्वाणमथो वेदं विभेद नवकेनतु ॥ १० ॥
भेदैरष्टादशैव्यासः पुराणं कृतवान् प्रभुः ।
सोऽयमेकश्चतुः पादो वेदः पूर्वं पुरातनः ॥११॥ इति ।

तेषु हि तत्संहिता चतुष्टयो पोत्तानां कथानकानां पश्चादपि काले काले मुनिसमाजेषु तत्र-तत्र कथोपकथनादिना सात्विकराजसतामसोपासनाद्यनेकविभिन्नार्थप्राधान्यानुरोधेन च मुख्यो-देशभेदादितिहास प्रबन्धभेदः प्रावर्तत आथायमितिहास विद्यावृत्तिकतया नियमितः सूतो लोमहर्षणः पश्चात्सम्भूतानामापि तत्तत्पुराण विद्यानुगतानां पुलस्त्यभीष्मादि पराशरमैत्रेयादि तत्तन्मुनि संवादानां यथायथं विद्वान् पुराणप्रचारणाय कदाचिन्नैमिषारण्यं गत्वा तानि वेदव्यासेनैवादा-वष्टादशधापरिच्छिन्नानि संहिताष्टकमध्यात्कतिपयसंहितोल्लेखानुवन्धीनि तानि शौनकादिभ्यो जिज्ञासुभ्य आचचक्षे तत्र यद्यपि तेषामष्टादशानां वेदव्यासव्यस्तानां पुराणानां यौर्वापर्य्यमन्यथा नियतमथापि जिज्ञासु जिज्ञासानुरोधिप्रवृत्तिकतया तत्क्रमानपेक्ष्येणैवायं लोमहर्षण स्तेभ्यो ब्राह्मं पाद्मं वैष्णवं कौर्मं मात्स्यं वामनं वाराहं ब्रह्मवैवर्तं नारदीयं भविष्यमित्येतानि दश पूर्णानि श्रावयित्वा आग्नेयस्याप्यर्द्धं श्रावितवान् । अथदैवान्नैमिषारण्यमागतो बलभद्रस्तत्रावशिष्टमाग्नेयं श्रावयन्त-मेवैनं शूद्रत्वादुच्चासनायोग्यमप्युच्चासनासीनं दृष्ट्वा क्रोधाकुलितो जघान । ततो लोमहर्षणे पञ्चत्वं गते व्यथितहृदयैस्तैः शौनकादिभिर्बलभद्रपरामर्शेन तत्पुत्रमुग्रश्रवसं नामसूतमाहूया ध्यासनं दत्वाऽवशिष्टं तत्सार्द्धं सप्तकं पुराणानाम श्रृयत तदेतदुक्तम् पाद्मोत्तरखण्डे भागवत-माहात्म्ये ।

शिव उवाच ।

ब्राह्मं पाद्मं वैष्णवं च कौर्मं मात्स्यं च वामनम् ।
वाराहं ब्रह्म वैवर्तं नारदीयं भविष्यकम् ॥१॥

आग्नेयमर्द्धं वै सूताच्छुश्रुवुर्लोमहर्षणात् ।
एतानि तु पुराणानि द्वापरान्ते श्रुतानि हि ॥२॥
शौनकाद्यैर्मुनिवरैर्यज्ञारम्भात् पुरैव हि ।
यदा तु तीर्थयात्रायां बलदेवः समागतः ॥ ३ ॥
नैमिषं मिश्रिकं नाम समाहूतो मुनीश्वरैः ।
तत्र सूतं समासीन दृष्ट्वा त्वध्यासनोपरि ॥ ४ ॥
चुक्षुभे भगवान् रामः पर्वणीव महोदधिः ।
आषाढशुक्लद्वादश्यां पारवणाहनि पार्वति ॥ ५ ॥
पूर्वार्द्धयाम वेलायां भावित्वात् कृष्णमायया ।
मूढो दर्भकरो रामः प्राहरल्लोमहर्षणम् ॥ ६ ॥
ततो मुनि गणाः सर्वे हाहाकार परायणाः ।
बभूवुर्नगजेत्यर्थं शोकदुःखाकुलान्तराः ॥ ७ ॥
ऊचुश्च रामं लोकेशं विनयेन क्षमापराः ।
राम राम महाबाहो भवता लोककारिणा ॥ ८ ॥
अजानते वा चरिता हिंसा ब्रह्मवधाधिका ।
व्यासशिष्यो ह्ययं साक्षात्पुराणर्षिर्महातपाः ॥ ९ ॥
अस्मै ह्युच्यासनं दत्तं मस्माभिर्यज्ञ कर्मणि ।
अष्टादशपुराणानां वाचकाय कृतक्षणैः ॥ १० ॥
ततः प्रोवाच भगवान् रामः शत्रु निषूदनः ।
विप्राः शृणुत भद्रं वः कोपं त्यक्त्वा सुदूरतः ॥ ११ ॥
अस्य पुत्रो महाज्ञानी भविष्यति वरान्मम ।
भवतामीप्सितं सर्वं शास्त्रं वै कथयिष्यति ॥ १२ ॥
इति श्रुत्वा वचस्तेतु रामस्य सुमहात्मनः ।
लोमहर्षणि माहूय सत्कृत्य नगनन्दिनि ॥ १३ ॥

तत्पदे स्थापयामासुः शेषसङ्कीर्त्तनाय वै ।
आग्नेयोत्तरमाहात्म्यं श्रीमद्भागवतान्तकम् ॥१४॥
पुराणसप्तके साद्धं शुश्रुवुर्हृष्टमानसाः ॥ १५ ॥

इति ॥ लोमहर्षणजीवदशायामपि नैकान्ततो लोहमर्षण एव प्रत्यहं श्रावयामास । किन्तु तत्रापि मध्ये मध्ये तत्पुत्रोऽयमुग्रश्रवा लोमहर्षणाज्ञया नैमिषारण्यं गत्वा यथायथमाचचक्षे । एवेत्थमादेवपद्मपुराणाद् विज्ञायते स्मर्य्यते हि तत्रोग्रश्रवःप्रोक्ते पाद्मे सृष्टिखण्डे पुराणोपक्रमप्रकरणे लोमहर्षणाज्ञया उग्रश्रवसः पाद्मपुराणकथनम् तथाहि—

सूतमेकान्तमासीनं व्यासशिष्यं महामतिः ॥
लोमहर्षणनामा वा उग्रश्रवसमाह तत् ॥१॥
ऋषीणामाश्रमांस्तात गत्वा धर्मान् समासतः ॥
पृच्छतां विस्तराद् ब्रूहि यन्मत्तः श्रुतवानसि ॥२॥
वेदव्यासान्मया पुत्र ! पुराणान्यखिलानि च ॥
तवाख्यातानि प्राप्तानि मुनिभ्यो वद विस्तरात् ॥३॥
ईजिरे दीर्घसत्रेण ऋषयो नैमिषे तदा ॥
तत्र गत्वा तु तान् ब्रूहि पृच्छतो धर्मसंशयान् ॥४॥
उग्रश्रवास्ततो गत्वा ज्ञानविन्मुनिपुङ्गवान् ॥
अभिगम्योपसंगृह्य नमस्कृत्वा कृताञ्जलिः ॥५॥
तोषयामास मेधावी प्रणिपातेन तानृषीन् ॥
ते चापि सत्रिणः प्रीताः ससदस्या महात्मने ॥६॥

ऋषय ऊचुः ।

कुतस्त्वमागतः सूत ! कस्मादेशादिहागतः ॥
कारणं चागमे ब्रूहि वृन्दारकसमद्युते ! ॥७॥

सूत उवाच ।

पित्राहं तु समादिष्टो व्यासशिष्येण धीमता ।
शुश्रूषस्व मुनीन् गत्वा यत्ते पृच्छन्ति तद्वद ॥ ८ ॥
वदन्तु भगवन्तो मां कथयामि कथां तु याम् ।
पुराणं चेतिहासं वा धर्मानथ पृथग्विधान् ॥ ९ ॥
अथ तेषां पुराणस्य शुश्रूषा समपद्यत ।
दृष्ट्वा तमतिविश्वस्तं विद्वांसं लौमहर्षणिम् ॥ १० ॥
तस्मिन् सत्रे कुलपतिः सर्वशास्त्रविशारदः ।
शौनको नाम मेधावी विज्ञानारण्यके गुरुः ॥ ११ ॥
इत्थं तद्भावमालम्ब्य धर्मांश्छुश्रूषुराह तम् ।
त्वया सूत महाबुद्धे भगवान् ब्रह्मवित्तमः ॥ १२ ॥
इतिहास पुराणार्थं व्यासः सम्यमुपासितः ।
दुदोहिथ मतिं तस्य त्वं पुराणाश्रयां शुभाम् ॥ १३ ॥
अमीषां विप्रमुख्यानां पुराणं प्रति संप्रति ।
शुश्रूषास्ते महाबुद्धे तच्छ्रावयितुमर्हसि ॥ १४ ॥
सर्वे हीमे महात्मानो नानागोत्राः समागताः ।
स्वान् स्वानंशान् पुराणोक्ताच्छृण्वन्तु ब्रह्मवादिनः ॥ १५ ॥
संपूर्णे दीर्घसत्रेऽस्मिंस्तांस्त्वं श्रावय वै मुनीन् ।
पाद्मं पुराणं सर्वेषां कथयस्व महामते ॥ १६ ॥
कथं पद्मं समुद्भूतं ब्रह्मा तत्र कथन्वभूत् ।
प्रोद्भूतेन कथं सृष्टिः कृता, तां तु तथा वद ॥ १७ ॥
एवं पृष्टस्ततस्तांस्तु प्रत्युवाच शुभां गिरम् ।
सूक्ष्मं च न्यायसंयुक्तं प्राब्रवीद्रौमहर्षणिः ॥ १८ ॥

धर्म एष तु सूतस्य सद्भिर्दृष्टः सनातनः ।
देवतानामृषीणां च राज्ञां चामिततेजसाम् ॥ १९ ॥
वंशानां धारणं कार्य्यं स्तुतीनां च महात्मनाम् ।
न हि वेदेष्वधीकारः कश्चित् सूतस्य दृश्यते ॥ २० ॥
येऽत्र क्षत्रात् समभवन् ब्राह्मण्याश्चैव योनितः ।
पूर्वेणैव तु साधर्म्याद्वै धर्मास्ते प्रकीर्तिताः ॥ २१ ॥
मध्यमो ह्येष सूतस्य धर्मः क्षेत्रोपजीविनः ।
पुराणेष्वधिकारो मे विहितो ब्राह्मणैरिह ॥ २२ ॥
दृष्ट्वा धर्ममहं पृष्टो भवद्भिर्ब्रह्मवादिभिः ।
तस्मात् सम्यग् भुवि ब्रूयां पुराणमृषिपूजितम् ॥ २३ ॥
प्रवक्ष्यामि महापुण्यं पुराणं पद्मसंज्ञितम् ।
सहस्रं पञ्चपञ्चाशत् पञ्चखण्डैः समन्वितम् ॥ २४ ॥
तत्रादौ सृष्टिखण्डं स्याद् भूमिखण्डं ततः परम् ।
स्वर्गखण्डं ततः पश्चात् ततः पातालखण्डकम् ॥ २५ ॥
पञ्चमं च ततः ख्यातमुत्तरं खण्डमुत्तमम् ।
एतदेव महापद्ममद्भूतं यन्मयं जगत् ॥ २६ ॥
तद्वृत्तान्ताश्रयं यस्मात् पाद्ममित्युच्यते ततः ।
एतत्पुराणममलं विष्णुमाहात्म्यनिर्म्मलम् ॥ २७ ॥

इत्थमुपक्रम्य लोमहर्षणपुत्रोऽयमुग्रश्रवाः सूतः पञ्चभिः खण्डैः परिच्छिद्य सर्वं पाद्मं श्रावयामास । स चायमुग्रश्रवसः सर्वप्रार्थमिकेः पुराणकथनप्रस्ताव इत्यप्येतल्लेखस्वारस्येनाव-गम्यते । किन्तु, अस्मिन्नेवोग्रश्रवसः पाद्मे उत्तरखण्डे पाद्मपुराणस्य लोमहर्षणश्रावितपुराण दशकान्तर्गतत्वं स्मर्य्यते तदेतदुभयवचनविरोधाल्लोमहर्षणप्रातिनिध्येनाप्युग्रश्रवसः पुराणवक्तृत्वं सिध्यतीति सुव्यक्तम् । तथा च विज्ञायते लोमहर्षणस्तावत्तत्र गत्वा आदिखण्ड-भूमिखण्ड-ब्रह्मखण्ड-पातालखण्ड-क्रियाखण्डोत्तरखण्डात्मकैः षड्भिः खण्डैः परिच्छिद्य पाद्मं श्रावयितुं प्रवर्तमानोऽपि केनचित्कारणेन आदिखण्ड-ब्रह्मखण्ड-क्रियाखण्डान्येव श्रावयामास नतु सावशेषं श्रावयितं

लब्धावसरो बभूव अतएवावशिष्टपूरणेन सावशेष यथास्यात्तथा पाद्मं श्रोतुमीहमानैरपि तैः शौनकादिभिर्मुनिभिरस्य वागतस्यम सूतपुत्रस्योग्रश्रवसो विद्यापरीक्षणार्थमवादितः पाद्मं श्रावयितुमिव प्रेर्य्यमाण उग्रश्रवा महोत्साहो भूमिखण्ड-पातालखण्डोत्तरखण्डमात्रकथनौचित्येऽपि जिज्ञासासामान्यात् सम्पूर्णमेव पाद्मादितः सृष्टिखण्ड-भूमिखण्ड-स्वर्गखण्ड पातालखण्डोत्तरखण्डात्मकैः पञ्चभिःखण्डैः परिच्छिद्य संश्रावयामास। तथाचेदं पाद्मं पुराणं द्विविधमभूत् लोमहर्षणप्रोक्तं षट् खण्डमेकम् (१) उग्रश्रवः प्रोक्तं पञ्चखण्डं द्वितीयम् (२) तत्र लौमहर्षणमसम्पूर्णं भूमिखण्डपातालखण्डोत्तरखण्डानुपलब्धेः। औग्रश्रवसमपि स्वर्गखण्डविकलमेवास्माकमुपलब्धम् न चौग्रश्रवसघटकानां भूमिखण्डपातालखण्डोत्तरखण्डानां लौमहर्षणघटकत्वमाशङ्क्यम्, तेषामौग्रश्रवसत्वस्य तदुत्तरस्वारस्येनैवावगमात्। तथाहि भूमिखण्डस्यान्ते—

भूमिखण्डं नरः श्रुत्वा सर्वपापैः प्रमुच्यते।
मुच्यते सर्वदुःखेभ्यः सर्वरोगैः प्रमुच्यते ॥ १ ॥

इति भूमिखण्डस्तुतिमुक्त्वा तत्प्रसङ्गेन सम्पूर्णस्य पाद्मस्य स्तुतिः पठ्यते—

श्रोतव्यं हि प्रयत्नेन पद्माख्यं पापनाशनम्।
प्रथमं सृष्टिखण्डं तु द्वितीयं भूमिखण्डकम् ॥ १ ॥
तृतीयं स्वर्गखण्डं च पातालं तु चतुर्थकम्।
पञ्चमं चोत्तरंखण्डं सर्वपापप्रणाशनम् ॥ २ ॥
यः शृणोति नरो भक्त्या पञ्चखण्डान्यनुक्रमात्।
गोप्रदानसहस्रस्य मानवो लभते फलम् ॥ ३ ॥

इत्येवं पञ्चखण्डोपादानस्य भूमिखण्डस्य पञ्चखण्डात्मक पद्मपुराणावयवत्वं बोध्यते। एवं पातालखण्डस्याप्युपक्रमे—

ऋषय ऊचुः।

श्रुतं सर्वं महाभाग! स्वर्गखण्डं मनोहरम्।
त्वत्तोऽधुना वदायुष्मञ् छ्रीरामचरितं हि नः ॥ १ ॥

इत्येवं पूर्वापरसंगतिप्रतिबोधके वाक्येऽस्य पातालखण्डस्य स्वर्गखण्डोत्तरत्वप्रतिपादनेनौग्रश्रवसाङ्गत्वस्य स्पष्टं प्रतीयमानत्वात्। यद्यपि लौमहर्षणे ब्रह्मखण्डमपि स्वर्गोत्तरनाम्ना व्यपदिश्यते। अथापि स्वर्गखण्डपदस्य औग्रश्रवसे स्वर्गखण्डात्मकविषयलाभे दूरोपस्थिता स्वर्गोत्तरखण्डपरता नावकल्पते इति बोध्यम्। एवमुत्तरखण्डेऽप्युपक्रमे—

ऋषय ऊचुः ।

श्रुतं पाताल खण्डं च त्वयाख्यातं विदांवर ।
नानाख्यानसमायुक्तं परमानन्ददायकम् ॥ १ ॥
अधुना श्रोतुमिच्छामो भगवद्भक्तिवर्द्धनम् ।
पाद्मे यच्छेषमस्तीह तद्ब्रूहि कृपया गुरो ॥ २ ॥

इत्येवं सङ्गतिबन्धात् पातालखण्डोत्तरत्त्वेनाभिमतस्यास्योत्तरखण्डस्य लौमहर्षणे क्रियाखण्डोत्तरस्थानोचितोत्तरखण्डात्मकत्वासम्भवात् । किञ्च एतस्मिन् पाद्मोत्तरखण्डे– 'कलौ सहस्रमब्दानामधुना प्रगतं द्विज । परीक्षितो जन्मकालात् समाप्तिं नीयतां मखः" इत्युक्त्या एतदुत्तरखण्डान्वितपाद्मस्य शौनकयज्ञावसानकालिकत्वप्रतिपादनादस्य लौमहर्षणपाद्मस्य चाभावस्य स्पष्टं प्रतिबोधितत्वात् अत्रैव खण्डे–पाद्मं वैष्णवं चेत्याद्युपक्रम्य एतानि तु पुराणानि द्वापरान्ते श्रुतानि हि । शौनकाद्यै र्मुनिवरैर्यज्ञारम्भात् पुरैव हि" इत्युक्त्या लौमहर्षणपाद्मस्य यज्ञारम्भपूर्वकालिकत्वप्रतिपादनेनैतत्खण्डस्य तदङ्गत्वासंभवात् । तस्मान्निःसन्दिग्धमेतानि औप्रश्रवसपाद्माङ्गानीति प्रतिपद्यते । अथैवमेव औप्रश्रवसे पाद्मे तृतीयं स्वर्गखण्डं नोपलभ्यते तत्रापि कैश्चिल्लौमहर्षणपाद्मस्यादिखण्डं सर्गखण्डाख्यया आदि सर्गखण्डाख्यया वा प्रसिद्धं प्रक्षिप्य स्थानपूर्तिं कुरुते, सर्गस्थाने च स्वर्गशब्दं प्रकल्प्य स्वर्गखण्डमादि स्वर्गखण्डमिति च व्यपदेष्टुं प्रसहते तदसत् तस्य लौमहर्षणप्रोक्तत्वात् पुराणोपक्रमप्रकरणोपक्रान्तत्वाच्चौप्रश्रवसेषु पञ्चखण्डेषु तृतीयस्थान संपातानर्हत्वात्, तथाहि-

एकदा मुनयः सर्वे ज्वलज्ज्वलनसंनिभाः ।
नैमिषं समुपायाताः शौनकं द्रष्टुमुत्सुकाः ॥ १ ॥
कथान्तेषु ततस्तेषां मुनीनां भावितात्मनाम् ।
आजगाम महातेजाः सूतस्तत्र महाद्युतिः ॥ २ ॥
व्यासशिष्यः पुराणज्ञो लोमहर्षणसंज्ञकः ।
तं पप्रच्छुर्महाभागाः शौनकाद्यास्तपोधनाः ॥ ३ ॥
पौराणिक महाबुद्धे रोमहर्षण सुव्रत ।
त्वत्तः श्रुता महापुण्याःपुरा पौराणिकीः कथाः ॥ ४ ॥

सांप्रतं च प्रवृत्ताः स्म कथायां सत्त्वणा हरेः ।
पुनः पुराणमाचक्ष्व हरिवार्त्ता समन्वितम् ॥ ५ ॥

सूत उवाच।

साधु साधु महाभागाः साधु पृष्टं तपोधनाः ।
तं प्रणम्य प्रवक्ष्यामि पुराणं पद्म संज्ञकम् ॥ ६ ॥
सहस्रं पञ्चपञ्चाशत् षड्भिः खण्डैः समन्वितम् ।
तत्रादावादि खण्डं स्याद् भूमिखण्डं ततः परम् ॥ ७ ॥
ब्रह्मखण्डं च ततपश्चात् ततः पातालखण्डकम् ।
क्रियाखण्डं ततः ख्यातमुत्तरं खण्डमुत्तमम् ॥ ८ ॥
एतदेव महापद्ममद्भुतं यन्मयं जगत् ।
तद्वृत्तान्ताश्रयं तस्मात्पाद्ममित्युच्यते बुधैः ॥ ९ ॥
तत्रादिखण्डं वक्ष्यामि पुण्यं पापविनाशनम् ।

इतीत्थं हि तस्योपक्रमः । तस्मान्नेदं लौमहर्षणं सर्गखण्डमौग्रश्रवसं स्वर्गखण्डं भवितुमर्हति । खण्डप्राथमिकत्वोचितमपि वा तृतीयस्थानासादनयोग्यतां धत्ते, तस्मादौग्रश्रवसं स्वर्गखण्डमतिरिक्तमेवास्तीत्यन्वेष्टव्यम् । अथैवं लौमहर्षणे पाद्मे ऽप्यनुपलभ्यमानानां भूमिखण्डपातालखण्डोत्तरखण्डानां सत्ता संभाव्यते । प्रतिज्ञातखण्डक्रमानुसारेण प्रथम—तृतीय—पञ्चमखण्डोपलब्ध्या द्वितीय—चतुर्थ—षष्ठखण्डानामपि प्रतिपादनावश्यम्भावात् इत्याहुः । वयं तु ब्रूमः । अत्रैतेषूपलभ्यमानेषु लौमहर्षणपाद्मखण्डेषु सर्गखण्डाख्यमादिखण्डमेव लोमहर्षणप्रोक्तं प्राचीनम् । आदिखण्डमुक्त्वा केनचित्कारणेन सम्पूर्णं वक्तुमलब्धावसरेणैव तेन सम्पूर्णपाद्मश्रावणाय उग्रश्रवःप्रेषणात् न तु मध्ये मध्ये एकैकं खण्डं त्यक्त्वा तदुत्तरखण्डकथनमवकल्पते ।

एकदा मुनयः सर्वे सर्वलोकहितैषिणः ।
सुरम्ये नैमिषारण्ये गोष्ठीं चक्रुर्मनोरमां ॥

इति पुराणोपक्रमाख्यप्रकरणोपक्रान्तस्य क्रियायोगसारस्य स्वतन्त्रप्रकरणग्रन्थत्वे सम्भवेऽपि लौमहर्षणपाद्मपुराणाङ्गत्वायुक्तत्वात् प्रथमेतरखण्डेषु पुराणोपक्रमाख्यप्रकरणोप-

क्रमस्य पुराणलेखपरिपाटीविरुद्धत्वात्। तस्मादादिसर्गखण्डमात्रं लोमहर्षणप्रोक्तं पद्मपुराणं विभिन्नं भवति। अथ सृष्टिखण्डादिपञ्चखण्डोपेतमौग्रश्रवसं पद्मपुराणं विभिन्नं भवतीतीत्थं पाद्मद्वयं व्याख्यातं द्रष्टव्यम्।

न चेदं पद्मपुराणं द्विविधमिति श्रुत्वा आश्चर्य्यवदालोच्यम्, कर्तृभेदेन निबन्धभेदावश्यम्भावात्। सन्ति हि अनेकनिबन्धाः प्रत्येकपुराणस्य यथा। चतुःश्लोकीभागवत् मन्यत् सप्तश्लोकीभागवत् मन्यत् अष्टादशसहस्रश्लोकं वा लोमहर्षणप्रोक्तं भागवतमन्यत् अष्टादशसहस्रश्लोकबद्धमौग्रश्रवसं च भागवतं नामान्यद् इतीत्थमनेकानि भागवतान्युपलभ्यन्ते एवमेवान्येषामत्यष्टादशशाखाबद्धानां पुराणानां प्रत्येकस्य तत्तत्संवादानुरोधिनो निबन्धाः पार्थक्येनैवाभूवन्निति विज्ञायते संज्ञाविशेषास्तु ब्राह्मपाद्मादयः न विभिद्यन्ते तेष्वापि संवादविशेषविभिन्नेषु नाना निबन्धेषु प्रत्येकस्मिन् ग्रन्थकर्तृस्वारस्यानुरोधेन ग्रन्थसंख्याभेदः प्रकरणविच्छेदविभेदश्च संसिद्धः यथैतस्मिन्नेवपाद्मेतावदालोक्यताम्। लोमहर्षणप्रोक्तं पाद्मम दितोऽन्यसंवादपरम्परासिद्धार्थनिबद्धम्। तदुक्तम् तत्रव—

लोमहर्षण उवाच।

देवदेवो हरिर्यद्वै ब्रह्मणे प्रोक्तवान् पुरा।
ब्रह्मा तन्नारदायाह नारदोऽस्मद्गुरोः पुरः॥ १॥
व्यासः सर्वपुराणानि सेतिहासानि संहिताः।
अध्यापयामास मुहुर्मामतिप्रियमात्मनः॥ २॥
तत्तोऽहं संप्रवक्ष्यामि पुराणमतिदुर्लभम्। इति।

अत्र विष्णुब्रह्मसंवादे शुद्धं पाद्मम् १। ततो ब्रह्मनारदसंवादे विष्णुब्रह्मसंवादोऽपि विषयी भवतीति विभिन्नो निबन्धः पाद्मस्य २। ततो नारदव्याससंवादे पूर्वसंवादौ विषयीभवत इत्यन्यो निबन्धः पाद्मस्य ३। ततो व्याससूतसंवादे पूर्वे संवादास्त्रयोऽपि विषयी भवन्तीत्यपरो निबन्धः ४ अथेदानीं सूतशौनकसंवादे ते चत्वारोपि प्राकृतनाः संवादा विषयीभूता इति स विलक्षण एव निबन्धः पञ्चमो य इदानीमुपलभ्यते लौमहर्षणः पद्मपुराणाख्यः स चायमेव पञ्चमसंवादसिद्धः पाद्मनिबन्धः षट्खण्डः पञ्चपञ्चाशत् सहस्रश्लोकबद्धश्च न तु पूर्वेऽपीति मुख्यकम्। एषां पञ्चानामपि निबन्धानामाकारप्रकारभेदेऽपि मुख्योद्दिष्टविषयैक्यानुरोधेन पाद्मसंज्ञा न विरुध्यते। इत्थमन्यदुग्रश्रवःप्रोक्तं पाद्ममादितोऽन्यसंवादपरम्परा सिद्धार्थनिबद्धम् तदुक्तं तत्रैव—

देवदेवो हरिर्यद्वै ब्रह्मणे प्रोक्तवान् पुरा ।
ब्रह्मणाभिहितं पूर्वं यावन्मात्रं मरीचये ॥ १ ॥
एतदेव च वै ब्रह्मा पाद्मं लोके जगाद वै ।
सर्वभूताश्रयं तच्च पाद्ममित्युच्यते बुधैः ॥ २ ॥
पाद्मं तत् पञ्चपञ्चाशत्सहस्राणीह पठ्यते ।
पञ्चभिः पर्वभिः प्रोक्तं संक्षेपाद् व्यासकारितात् ॥ ३ ॥
(१) पौष्करं प्रथमं पर्व यत्रोत्पन्नः स्वयं विराट् ।
(२) द्वितीयं तीर्थपर्वस्यात् सर्वग्रहगणाश्रयम् ॥ ४ ॥
(३) तृतीयंपर्वग्रहणा राजानो भूरिः दक्षिणाः ।
(४) वंशानुचरितं चैव चतुर्थे परिकीर्तितम् ॥ ५ ॥
(५) पञ्चमे मोक्षतत्वं च सर्वतत्वं निगद्यते ।
(१) पौष्करे नवधासृष्टिः सर्वेषां ब्रह्मकारिता ॥ ६ ॥
देवतानां मुनीनां च पितृसर्गस्तथा परः ।
(२) द्वितीये पर्वताश्चैव द्वीपाः सप्तः ससागराः ॥ ७ ॥
(३) तृतीये रुद्रसर्गस्तु दक्षशापस्तथैव च ।
(४) चतुर्थे संभवो राज्ञां सर्ववंशानु कीर्तनम् ॥ ८ ॥
(५) अन्त्येऽपवर्गसंस्थानं मोक्षशास्त्रानुकीर्तनम् ।
सर्वमेतत्पुराणेऽस्मिन् कथयिष्यामि वो द्विजाः ॥ ९ ॥ इति ।

तत्र पूर्वनिर्दिष्टमेव विष्णुब्रह्म संवादसिद्धं पाद्मं ब्रह्मणा मरीचये प्रोक्तम् तेन तु मरीचिना पुनरनाख्यानात्परम्परा न प्रचरिता । किन्तु ब्रह्मणैव पुनरन्यस्मै प्रोक्तम् कस्मै इत्याकांक्षाया मुक्तं तेनैवाग्रे—

ब्रह्मणा यत्पुरा प्रोक्तं पुलस्त्याय महात्मने ।
पुलस्त्येनाथ भीष्माय गङ्गाद्वारे प्रभाषितम् ॥ १ ॥

सूतेनानुक्रमेणेदं पुराणं संप्रकाशितम् ।
ब्राह्मणेषु पुरा यच्च ब्रह्मणोक्तं सविस्तरम् ॥ २ ॥

तदित्थं ब्रह्मपुलस्त्य संवाद सिद्धे पाद्मनिवन्ध नत्त्वेव पुलस्त्य भीष्मादि संवादा विषयी भवन्ति । एवं पुलस्त्य भीष्म संवादे पूर्वसंवादोल्लेखा द्वैलक्षण्येऽपि सूतशौनकसंवादादयो नोल्लिख्यन्ते । अथैतमेव पाद्मंलोमहर्षणाख्येन सूतेन मत्पित्रा पूर्वं सविस्तरं प्रकाशितम् । तदेव पाद्मं वेदव्यासेन पूर्वं पञ्चभिः पर्वभिरुपनिबद्धमासीत् । तेषु च पञ्चसु पर्वसु इत्थमित्थं विषया निर्दिष्टाः सन्तिः । तामेव सर्वान् विषयान् निबन्धांश्चालोच्य मयेदानीं पञ्चभिः खण्डैः परिच्छिद्य पञ्चपञ्चाशत्सहस्रश्लोकैर्यष्मभ्यमाख्यायते इत्यर्थः ।

तदित्थमुग्रश्रवसः पाद्मपुराणवचनेन स्पष्टमनेकेषां पद्मपुराणानां विभिन्नाकार-प्रकाराणां सत्ता सिध्यति । तथैवान्येषामपि ब्राह्मादिपुराणानामनेकानेकनिबन्धाः काले काले विभिन्नकर्तृकाः सम्भाव्यन्ते तथा हि—ब्राह्मं पाद्मं वैष्णवं चेत्याद्यौग्रश्रवसः पाद्मोत्तरखण्ड-वचनेन ब्राह्मपाद्मवैष्णवानां नारदीय-भविष्यब्रह्मवैवर्त्तवाराहाणां वामनकौर्ममात्स्यानामाग्नेयार्द्धस्य च द्वापरान्ते शौनकादियज्ञारम्भात् प्रागेव । लोमहर्षणप्रोक्तत्वं लभ्यते । इतरेषांतु सार्द्धसप्तपुराणानां वायवीय-भागवत-मार्कण्डेयानां लैङ्गस्कान्दगारुडब्रह्माण्डानामाग्नेयोत्तर-माहात्म्यस्य च कल्पब्द सहस्रपूर्तौ शौनकादियज्ञानवसानकाले लोमहर्षणपुत्रोग्रश्रवः प्रोक्तत्व-मवसीयते । अथापीदानीमुपलभ्य मानेषु पुराणग्रन्थेषु औग्रश्रवसत्वेनाभिममतानामपि सप्तानां मध्याकेषांचिल्लोमहर्षण प्रोक्तत्वं दृश्यते तथान्येषां लौमहर्षणत्वेनाभिमतानामपि दशानां मध्यात् । केषांचिदुग्रश्रवःप्रोक्तत्वं दृश्यते । यथा—लिङ्गपुराणे—

दृष्ट्वातमतिविश्वस्तं विद्वांसं रोमहर्षणम् ।
अपृच्छंश्च ततः सूतमृषिं सर्वे तपोधनाः ॥
(१ अ० १० श्लोक)

कथं पूज्यो महादेवो लिङ्गमूर्तिर्महेश्वरः ।
वक्तुमर्हसि चास्माकं रोमहर्षणसांप्रतम् ॥ (२५ अ० १श्लोक)

इत्येव माद्युक्त्या तस्य रोमहर्षण शौनकसंवाद सिद्धत्वं लभ्यते । वायुपुराणस्यापि संबुध्य-तन्नाम्नो निरुक्त्यादिना प्रशंसना द्रोमहर्षण प्रोक्तत्वं सिद्धयति । एवं मत्स्यपुराणे यद्यपि लोमहर्षणोग्रश्रवसोनीमोल्लेखो नास्ति । अथापि दीर्घसत्रान्ते प्रकथना दौग्रश्रवसत्वं विज्ञायते । पाद्मोत्तर वचनेन लोमहर्षण प्रोक्तमात्स्यस्य यत्रारम्भतः पूर्वकालिकत्वावगमात् । अथ ब्रह्मवैवर्तस्यापीदानी-

मुपलभ्यमानस्य सौतिशौनक-संवादमुखेन प्रवृत्ततत्वादौग्रश्रवसत्वमवधार्यते लोमहर्षण सौतित्व-संभवेऽपि सुप्रसिद्ध पदार्था ये स्वतन्त्रालोकविश्रुत कर्त्तव्यशब्देषु न तदुक्तिषु-इति न्यायेनात्र पुराणे उग्रश्रवसोरेव सूतपदेन ग्रहणात् सौतिपदेन चोग्रश्रवस एव ग्रहणाच्चित्यात्। न चेत्थं सति पाद्म विरोधः। तत्रैवोग्रश्रवसा प्रोक्ते पाद्मे पाद्मस्य लोमहर्षणप्रोक्तत्व प्रतिपादनादवश्यं लोमहर्षण-प्रोक्तानामपि केषांचित्पुराणनामुत्तरकाले उग्रश्रवःप्रोक्तत्व निबन्धवत्वावगमात्। तदित्थमेतेष्वष्टा-दशपुराणेषु केषांचिल्लोमहर्षण प्रोक्तत्वमेव ॥ १ ॥ केषां चिदुग्रश्रवः प्रोक्तत्वमेव ॥ २ ॥ केषांचिदुभय प्रोक्तत्वान्निबन्धद्वैधम्। केषांचित्तूभयानुक्तत्वादन्यप्रोक्तत्वमेव ॥ ३ ॥ यत्र निबन्ध-द्वैधं तत्रान्यतरगणतया अष्टादश संख्या पूर्तिः क्रियते। यथा लौमहर्षण पाद्मेनौग्रश्रवसः पाद्म-वा। लौमहर्षणेन देवीभागवतेनौग्रश्रवसेन श्रमद्भागवतेन वा। लौमहर्षणेन वायुपुराणे नौग्रश्रवसेन शिवपुराणेन वा इत्थं ब्रह्मवैवर्त्तादावपि बोध्यम्।

एतेषां चोत्तरोत्तरमनेक कर्तृकाणां तस्मै तत्र तत्र पुराणेतरविषयैः समुपबृंहितरूपत्वेऽपि वह्न्यायुधालङ्काराद्या वृतदेवदत्तशरीरस्य देवदत्तशरीरत्ववत्त्व न विहन्यते इत्युक्त प्राक्। यथैकैकस्मिन् व्याकरणे कर्त्रादिभेदाद् ग्रन्थबाहुल्येऽपि व्याकरणाष्टसंख्या न विहन्यते। एव एकैकस्मिन् पुराणे कर्त्रादिभेदाद् ग्रन्थ बाहुपुराणाष्टादश संख्या न विरुध्यते इत्यपि। ब्रह्मादिसूतान्तानाम-नेकेषां तत्र तत्र प्रवचनकर्तृत्वेनाख्यानात्। पूत प्रवचनेऽपि द्वैविध्यं भवति लोमहर्षणोग्र-श्रवसोः सूतयोः कालभेदेन प्रवक्तृत्वात्॥

सृष्टिविद्यायाः प्रकारभेदेनानेकधा दर्शयितुं शक्यत्वान्मन्त्रब्राह्मणेषु निदर्शितानामष्टादशानां सृष्टिकल्पानामनुरोधेन सिद्धाया अष्टादशसंख्यायास्तादृशपुराणविद्यानिष्ठत्वेऽपि तत्तदनेक-कर्तृकत्वानिबन्धपरिच्छेदकत्वाभावात्॥ तस्मात् संभवन्ति शतशः पुराणनिबन्धाः अथा-प्यष्टादशैव पुराणानीति सिद्धम्। अतएवोत्तरकालेऽपि कालेकाले तानेवाष्टादशसृष्टिकल्पानव-लम्ब्य कतिपय पुराणनिबन्धान्यैरन्यैर्मुनिभिः संकलितास्तेषामपि तत्तत्कल्पानुगमानुरोधेन पूर्वनिर्दिष्टाष्टादशपुराणान्तःपातित्वं स्मरन्ति॥ ते यथा देवीभागवते (१।३)॥

तथैवोपपुराणानि शृणवन्तु ऋषिसत्तमाः।
सनत्कुमार[1] प्रथमं नारसिंह[2] ततः परम् ॥ १ ॥
नारदीय[3] शिवं चैव[4] दौर्वाससमनुत्तमम्[5]।
कापिल[6] मानव[7] चैव तथा चौशन[8] संस्मृतम् ॥ २ ॥

वारुणं[९] कालिकाख्यं[१०] च सावं[११] नन्दिकृतं[१२] शुभम् ।
सौरं[१३] पाराशरं[१४] प्रोक्तमादित्यं[१५] चातिविस्तरम् ॥ ३ ॥
माहेश्वरं[१६] भागवतं[१७] वासिष्ठं[१८] च सविस्तरम् ।
एतान्यथ पुराणानि कथितानि महात्मभिः ॥ ४ ॥

तथा मात्स्ये त्रिपञ्चाशाध्यायेपुराणानुक्रमणिकाख्ये—

उपभेदात् प्रवक्ष्यामि लोके ये सम्प्रतिष्ठिताः ।
पाद्मे पुराणे यत्रोक्तं नरसिंहोपवर्णनम् ॥ १ ॥
तच्चाष्टादशसाहस्रं नारसिंहमिहोच्यते ।
नन्दाया यत्र माहात्म्यं कार्तिकेयेन वर्ण्यते ॥ २ ॥
नन्दी पुराणं तल्लोकैराख्यातमिति कीर्त्यते ।
यत्र शास्त्रं पुरस्कृत्य भविष्येऽपि कथानकम् ॥ ३ ॥
प्रोच्यते तत्पुनर्लोके शाम्बमे तन्मुनिव्रताः ।
एवमादित्यसंज्ञा च तत्रैव परिगद्यते ॥ ४ ॥
ऋष्टादशभ्यस्तु पृथक् पुराणं यत् प्रदृश्यते ।
विजानीध्वं द्विजश्रेष्ठास्तदे तेभ्यो विनिर्गतम् ॥ ५ ॥

❀ इति ❀

* अथ वेदपुराणादि शास्त्रावतारे *

वेदशाखोत्पत्तिक्रमः

आह मैत्रेयं प्रति भगवान् पराशरः—

आद्यो वेदश्चतुः पादः शत साहस्र संमितः।
ततो दश गुणः कृत्स्नो यज्ञोऽयं सर्वकामधुक् ॥

अग्निहोत्रं, दर्शपूर्णमासः चातुर्म्मास्यं, पशुः, सोमः इति पञ्चविध एव प्रकृति विकृति-द्वैविध्याद्दशविध इत्येके। गृह्योक्तैः पञ्चयज्ञैः सह दशविधत्व मित्यन्ये।

(तमेव मेकं चतुः पादं वेदं कृष्णद्वैपायनो नाम पराशर पुत्रश्चतुर्द्धा व्यभजत्।)

ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदश्चेति।

एकमासीद् यजुर्वेद स्तं चतुर्धा व्यकल्पयत्।
चतुर्होत्रमभूद् यस्मिन् तेन यज्ञमथाकरोत् ॥ १ ॥
आध्वर्य्यवं यजुर्भिस्तु ऋग्भिर्हौत्रं तथा मुने।
औद्गात्रं सामभिश्चक्रे ब्रह्मत्वं चाप्यथर्वभिः ॥ २ ॥
ततः स ऋच उद्धृत्य ऋग्वेदं कृतवान् मुनिः।
यजुर्भिश्च यजुर्वेदं सामवेदं च सामभिः ॥ ३ ॥
राज्ञस्त्वथर्ववेदेन सर्वकर्म्माणि स प्रभुः।
कारयामास मैत्रेय ब्रह्मत्वं च यथा स्थिति ॥ ४ ॥
सोऽयमेको महावेदतरुस्तेन पृथक्कृतः।
चतुर्द्धा तु ततो जातं वेदपादपकाननम् ॥ ५ ॥

यज्ञार्थं प्रवृत्तः पूर्वमेक एव यजुर्वेदो नाम वेद आसीच्चतुः पादो लक्षमितः। तस्मिन्नेकस्मिन्नेव यथोपयोगमोतप्रोता ऋग्यजुः सामात्मका मन्त्रा आसन्। तत्र यज्ञसौकर्य्यार्थं चातुर्होत्र-

मभूत। य आध्वर्य्यवं करोति सोऽध्वर्य्युर्नाम येन पुनस्तदुपयोगिन्य ऋचः प्रयुज्यन्ते स होता यस्तु साममन्त्रान् प्रयुङ्क्ते स उद्गाता। अथ यः सार्वविद्यो भवति स ब्रह्मा। तदेवं चतुर्णामपि ऋत्विजां प्रयोगसौकर्य्यार्थं प्रत्येक प्रयोज्यमन्त्रान् पृथक् पृथक् पद्धतिरूपेण सङ्कलय्य हौत्रोपयुक्तस्य ऋङ्मन्त्रसंग्रहस्य हौत्रक्रमनिर्दिष्टस्य ऋग्वेदसंज्ञा—आध्वर्यवोपयुक्तस्य यजुर्म्मन्त्रसंग्रहस्य यजुर्वेदसंज्ञा—औदगात्रोपयुक्तस्य साममन्त्रसंग्रहस्य तत्क्रमनिर्दिष्टस्य सामवेदसंज्ञा—ब्रह्मकर्म्मोपयुक्तस्य चाङ्गिरोमन्त्रसंग्रहस्य आथर्वणिक्रम निर्दिष्टस्य अथर्ववेद संज्ञान्यरूप्यन्त तदेवमेकस्मिन्नेव कर्त्तव्ये यज्ञे ऋत्विजां भेदात् तत्तत्सौकर्य्योद्देशेन कल्पिताः एकस्यैव वेदस्य चत्वारो भागा इति सिद्धम्। चतुष्वेपि चैतेषु भागेषु मन्त्रास्तु त्रिविधा एव। गद्य प्रधाना यजुर्मन्त्राः—पद्य प्रधाना ऋग्मन्त्राः—गीति प्रधानाश्च साममन्त्राः इति। एवं हि तिस्र एव रचना भवन्तीति रचनाभेदेन सर्वोवेदस्त्रयीशब्देनाभिनीयते। एवञ्च यज्ञऋत्विजश्चत्वारः इति यज्ञक्रिया निबन्धनञ्च चातुर्विध्यं वेदस्य सिद्धयति।

अथैवं विभज्य चतुरोभागान् कृष्णद्वैपायनश्चतुर एव शिष्यानेकैकं भागमग्राहयत्। तथैतस्मादेव वेदात्पुराणेतिहासभागं पृथक् संगृह्य पञ्चमवेदयानाम्ना शिष्यमेकमग्राहयत। तथाहि—

पैलम्	—	ऋग्वेदश्रावकं चकार
वैशम्पायनम्	—	यजुर्वेदश्रावकं चकार
जैमिनिम्	—	सामवेदश्रावकं चकार
सुमन्तुम्	—	अथर्ववेदश्रावकं चकार
रोमहर्षणन्तु	—	इतिहासपुराणयोश्चकार

ततः पैल ऋग्वेदं द्वाभ्यां संहिताभ्यां विभज्य शिष्यद्वयमग्राहयत्—

१ संहिता	इन्द्रप्रमत्तये	३
२ संहिता	बाष्कलाय	७

तत्र इन्द्रप्रमत्तिसंहिता त्रिभिरधीता—इन्द्रप्रमत्तिपुत्रेण मण्डकेयेन शाकल्येन वेदमित्रेण, शाकपूणिना च॥

अथ वेदमित्रः शाकल्य इन्द्रप्रमत्तिशाखामधीत्य संहितां पञ्चधा विभज्य पञ्चशिष्येभ्यः प्रादात्। ते च—मुद्गलः, गोखलुः, वात्स्यः, शालीयः, शिशिरः। अथ तृतीयः शाकपूणिस्तु तिस्रः संहिता विभज्य चतुर्थमेकं निरुक्तमप्यकरोत्। तदेवमिन्द्रप्रमत्तिशाखा आदौ त्रिधा—

१ मण्डकेय संहिता १
२ शाकल्य संहिता ५
३ शाकपूर्णिसंहिता ३

पुनरत्र मण्डकेयशाखा एका। शाकल्यशाखा तु पञ्चधाऽभूत्। यथा—

१ मुद्गल शाखा।
२ गोखलु शाखा।
३ वात्स्य शाखा।
४ शालीय शाखा।
५ शिशिर शाखा।

शाकपूर्णिसंहिताऽपि पुनस्त्रिविधा जाता। यथा—

१ क्रौञ्चशाखा।
२ वैतालकिशाखा।
३ बलाकशाखा।

अथान्या वाष्कलसंहिता पूर्वं चतुर्द्धा विभक्ता पुनरन्यथा त्रेधा विभक्ता तदेवं सङ्कलय्य सेयं वाष्कलसंहिता सप्तधा समभूत्। यथा—

१ बोध्यसंहिता।
२ अग्निमाठरसंहिता।
३ याज्ञवल्क्यसंहिता।
४ पराशरसंहिता।
१ कालायनिशाखा।
२ गार्ग्यशाखा।
३ कथाजवशाखा।

अथ यजुर्वेद श्रावकस्य वैशम्पायनस्य बहवः शिष्या अभूवन्। तत्र सर्वप्रधानो ब्रह्मराजपुत्रो भगवान् याज्ञवल्क्य आसीत्। एकदा केनापि कारणेन महामेरौ ऋषीणां समाजोऽभूत् तत्रोपस्थानाय मुनिगणैः समयः कृतः—

"ऋषिर्योऽद्य महामेरौ समाजे नागमिष्यति ।
तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ॥"

तमेवंकृतं समयं केनापि कारणेन वैशम्पायन एवैको व्यतिक्रान्तवान् । तेनास्य ब्रह्मवधशापादचिरादेवासौ पदास्पृष्टमेव स्वस्त्रीयं बालकमघातयत् । अतस्तत्प्रायश्चित्तार्थं-"मतकृते ब्रह्महत्यापहं व्रतं चरध्व"मिति सर्वान् शिष्यानाज्ञापयत्—

"अथाह याज्ञवल्क्यस्तं किमेभिर्भागवन् द्विजैः ।
क्लेशितैरल्पतेजोभिश्चरिष्येऽहमिदं व्रतम्" ॥ १ ॥

तदेतत्परावमानकारि गौरवगर्भितं वचनं श्रुत्वा क्रुद्धो वैशम्पायनो याज्ञवल्क्यं प्रत्याह ।

निस्तेजसो वदस्येतान् यस्त्वं ब्राह्मणपुङ्गवान् ।
तेन शिष्येण नार्थोऽस्ति ममाज्ञाभङ्गकारिणा ॥
मुच्यतां यत् त्वयाधीतं मत्तो विप्रावमानक ।
याज्ञवल्क्यस्ततः प्राह भक्त्यैतत्ते मयोदितम् ॥
ममाप्यलं त्वया धीतं यन्मया तदिदं द्विज ।

इत्युक्त्वा रुधिराक्तानि सरूपाणि यजूंषि छर्दयित्वा तस्मै दत्वा चासौ मुनिः स्वेच्छया ययौ । अथापरे शिष्या गुरुणाज्ञप्ता याज्ञवल्क्यविसृष्टानि तानि यजूंषि तित्तिरीभूत्वा जगृहुः । तेनैते तैत्तिरीयां अभवन् । एवं गुरुप्रेरितैर्यैर्ब्रह्महत्याव्रतं चीर्णं ते चरणादेव निमित्ताचारकाध्वर्य्यवोऽभूवन् । एवं तेभ्यः प्रवर्त्तिता सा यजुःसंहिता तैत्तिरीयसंहितानाम्ना प्रसिद्धिमगमत् ।

अथ याज्ञवल्क्यस्तु प्राणायामपरायणः प्रयतस्तत आरभ्य यजूंष्यभिलषन् सूर्य्यं तुष्टाव । तुष्टश्च भगवान् सूर्य्यो वाजिरूपधरः कामं व्रियतामिति प्राह । तदा याज्ञवल्क्यः प्रणिपत्य प्रार्थयामास—

"यजंषि तानि मे देहि यानि सन्ति न मे गुरौ"

एवं प्रार्थितो भगवान् सविता अयातयामसंज्ञानि यजूंषि तस्मै ददौ यानि तद्गुरुरपि न वेत्ति । अथ यतः सूर्य्योऽश्वोऽभवत् । तत एव तानि यजूंषि अधीयाना वाजिनः समाख्याताः । तेषां वाजिनां पञ्चदशशाखाभेदा अभूवन् । याज्ञवल्क्यस्य शिष्यैः कण्वादिभिः पञ्चदशभिः

प्रवर्त्तित्वादिति दिक्। तदेवमुभये मिलित्वा सप्तविंशतिर्यजुःशाखाः पराशरकालपर्य्यन्तमभूवन्। तथाचोक्तं तेन पुराणानां तृतीये विष्णुपुराणे—

"यजुर्वेदतरोः शाखाः सप्तविंशन्महामुनिः।
वैशम्पायननामासौ व्यासशिष्यश्चकार वै॥"

तदनन्तरन्तु उदीच्य मध्यदेश्यप्राच्यादिभेदेन चरकाध्वर्य्युणां षड्शीतिर्भेदा अभवन्। अतएव पुराणानामष्टादशे ब्रह्माण्डपुराणे सम्भूय एकाधिकशतमध्वर्य्यशाखा उक्ताः।

शतमेकाधिकं ज्ञेयं यजुषाम् ये विकल्पकाः॥

(ब्र० पु० अनु० पा० अ० ३५ श्लो० ३०)

अथ सामवेदश्रावको भगवान् जैमिनिरादौ तां संहितां द्वेधाकृतां क्रमेणैकैकां स्वपुत्राय सुमन्तवे स्वपौत्राय सुकर्म्मणे चाध्यापयामास। ततः सुकर्मा साहस्रं संहिताभेदं चकार। तमेतं संहिताभेदं तस्य सुकर्म्मणः शिष्यौ जगृहाते। एकः कौशल्यो हिरण्यनाभः, अपरः पौष्पिञ्जिश्च। तस्यैतस्य हिरण्यनाभस्य पञ्चदशशिष्याः पञ्चदशसंहिता अधीयानां उदीच्य सामगा उच्यन्ते। एवमन्ये तस्यैव पञ्चदशशिष्याः अन्यपञ्चदशसंहिताध्यायिनः प्राच्यसामगा उच्यन्ते। तत्रापि हिरण्यनाभस्योदीच्यसामगेषु पञ्चदशशिष्येषु मध्ये कश्चन कृतिनामा शिष्यः स्वशिष्येभ्यश्चतुर्विंशति संहिताः कृत्वा प्रोवाच। तैश्चाप्यसौ सामवेदः शाखाभिर्बहुली कृतः॥

अथापरः पौष्पिञ्जिरेतां संहितां चतुर्द्धाकृत्वा चतुरः शिष्यान् प्रत्येकमग्राहयत्। ते च यथा—लोकाक्षिः, कुथुमिः, कुवीदी, लाङ्गली च। अथ तच्छिष्य प्रशिष्यादिभिरप्यसौ सामवेदः शाखाभिर्बहुलीकृतः।

अतः परमथर्ववेदश्रावकः सुमन्तुः कबन्धं नाम शिष्यमध्यापयामास। स च कबन्धस्तां संहितां द्विधाकृत्वा देवदर्शाय पथ्याय च ग्राहयामास। तत्र देवदर्शः स्वसंहितां चतुर्धा कृत्वा चतुरः शिष्यान् पाठयामास। ते यथा—मौद्गः, ब्रह्मबलिः, शौल्कायनिः, पिप्पलादः इति॥ पथ्यस्यापि त्रयः शिष्यः संहिताकर्त्तारः। जाजलिः, कुमुदः, शौनकश्चेति। अथ शौनकः पुनरेतां द्विधा कृत्वा सैन्धवायनाय च प्रादात्। तेन शौनकसंहिताध्येतारो द्विधा विभक्ता अभूवन्। सैन्धवा

मुञ्जकेशाश्च (मुञ्जकेश इति ब्रह्मोरेव नामान्तरम्) तत्रैतासु आथर्वणिक संहितासु पञ्चैव संहिता विकल्पाः श्रेष्ठा भवन्ति नक्षत्रकल्पः, वेदकल्पः, संहिताकल्पः, आङ्गिरसकल्पः, शान्तिकल्पः इति भेदात् ।

१ तत्र नक्षत्रकल्पे नक्षत्रादि पूजा विधयः ।
२ वेदकल्पे वैतानिक ब्रह्मत्वादिभिः ।
३ संहिताकल्पे संहिताविधिः ।
४ आङ्गिरसकल्पेऽभिचारादि विधयः ।
५ शान्तिकल्पे अश्वगजाद्यष्टादशमहाशान्त्यादि विधिः ।

॥ इति वेदशाखोत्पत्तिक्रमः ॥



अथ पुराणावतारः

आख्यानैश्चाप्युख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराणसंहिता चक्रे पुराणार्थ विशारदः ॥ १ ॥

एतामेकां पुराणसंहिता कृत्वा भगवान् कृष्णद्वैपायनः सूताय निजशिष्याय रोमहर्षणाय ग्राह्यामास । तस्य पुनः सूतस्यापरे षट्शिष्या अभवन् । सुमतिः[1], अग्निवर्चाः[2], मित्रयुः[3], शांशपायनः[4], अकृतव्रणः[5], सावर्णिः[6] इतिभेदात् । अत्राकृतव्रणः कश्यपनाम्नाऽपिव्यवह्रियते । तत्रैतेषु षट सु शिष्येषु काश्यपः सावर्णिः शांशपायन इत्येते त्रयः संहिताकर्त्तारोऽभूवन् । तिसृणां चैतासां कश्यपसंहिता – सावर्णिसंहिता – शांशपायनसंहितानां मूलभूता रोमहर्षणिका सूतसंहिताऽऽसीत् । तदेवं संहिताचतुष्टयी सिद्धा ।

काश्यपः संहिताकर्त्ता सावर्णिः शांशपायनः ॥
रोमहर्षणिका चान्या तिसृणां मूलसंहिता ॥ १ ॥

एता एव चतस्रः संहिता अवलम्ब्य सर्वपुराणानामाद्यं ब्रह्मपुराणमुच्यते—इत्याह मैत्रेयं प्रति भगवान् पराशरः—

चतुष्टयेनाप्येतेन संहितानामिदं मुने ।
आद्यं सर्वपुराणानां पुराणं ब्राह्ममुच्यते ॥ २ ॥

ब्रह्मपुराणस्य सर्वपुराणादि भूतत्वं प्रतिपादयता भगवता पराशरेण ब्रह्मपुराणातिरिक्त-पुराणानां तदुत्तर भवित्व मुक्तप्रायम् । ब्राह्मपुराणस्य संहिता चतुष्टयमूलकत्वं प्रतिपादयता च सर्वेषामेव ब्रह्मपुराणादि पुराणानां तादृश संहिता चतुष्टयमूलकत्वमपि निगदितप्रायमेव । एवमेव सूतसंहितादि संहिताचतुष्टय्या मूलभूता वेदव्यासप्रणीता पुराणसंहितैवेति वेदव्यासस्यैव सर्व-पुराण मूलप्रवर्तकतामभिप्रयद्भिरुद्घोष्यते—

"अष्टादश पुराणानां कर्त्ता सत्यवती सुतः" इति ।

वस्तुतस्तु तेषामष्टादशानामपि कथाप्रसङ्ग प्रबन्धप्रस्ताविका भिन्नकाला भिन्नोद्देश्या भिन्नाभिन्ना एव मुनयः । यथा विष्णुपुराणस्य भगवान् पराशरः । पश्चात्तेषां सर्वेषामेव कथानकानां लिपिकर्त्ता तु लोमहर्षणपुत्रः पुराणवृत्तिः सूत उग्रश्रवा एक एवेति पुराणलेखस्वारस्येन स्पष्टं प्रतिभाति । किन्तु यान्येतानि वेदव्यासप्रणीत पुराणसंहिता मूलकसंहिता चतुष्टयी मूलकानि ब्राह्मादीन्यष्टादशपुराणानि तेषां वेदव्यास प्रमाण्यादेव प्रामाण्यम्। आप्तप्रामाण्याद्धि तद्वचन प्रामाण्यमिति न्यायादतो नैतेष्वष्टादशसु तत्तत् कर्तृणां तत्तत् कर्तृत्वोपचारः । येषां पुनरन्येषां वेदव्यासप्रणीतपुराणसंहितामनवलम्ब्यैव स्वस्वतपोबलदृष्टकथा प्रस्तावक तत्तन्मुनि प्रामाण्यदेव प्रामाण्यं तान्युपपुराणानि भवन्ति। अत एव नारदपुराणद्वयमध्ये नारदप्रवर्त्तकत्वा विशेषेऽपि यत्र वेदव्यास प्रामाण्यात्प्रामाण्यं तदष्टादश पुराणान्तर्गतम्। यत्र तु नारद प्रामाण्यादेव प्रामाण्यं तदुपपुराणमिति वदन्ति । वेदव्यासस्य चेश्वरावतारत्वाभिप्रायेणोपपुराणापेक्षया पुराणेषु श्रद्धातिशयो भवति भारतवर्षीयार्य्याणाम् । तत्र यद्यपि वेदव्यास प्रणीत पुराणसंहितायां वेदोद्धृतायां–आख्यानोपाख्यान गाथाकल्पशुद्धयात्मकानि चत्वार्येव लक्षणानि । तथापि तान्यन्यथावर्णकेन विभज्य ब्राह्मादि पुराणेषु तत्त-मुनिभिः पञ्चधार्थाः प्रतिपादिता इति तानि सर्वाण्यपि पञ्चलक्षणान्यभूवन् । तद्यथा—

"सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च ।
वंश्यानुचरितं चैवं पुराणं पञ्चलक्षणम् ॥"

तानि चैतानि पञ्चलक्षणानि पुराणसंहितासमुद्धृतानि पुराणान्यष्टादश भवन्तीत्यत्र न केषाञ्चिदपि विप्रतिपत्तिः । तथा चोक्तं पराशरादिभिः—

"अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते इति ॥"

तानि यथा विष्णुपुराणे—

१ ब्राह्मम् ।	७ मार्कण्डेयम् ।	१३ स्कान्दम् ।
२ पाद्मम् ।	८ आग्नेयम् ।	१४ वामनम् ।
३ वैष्णवम् ।	९ भविष्यम् ।	१५ कौर्म्मम् ।
४ शैवम् (वायव्यम्) ।	१० ब्रह्मवैवर्त्तम् ।	१६ मात्स्यम् ।
५ भागवतम् ।	११ लैङ्गम् ।	१७ गारुडम् ।
६ नारदीयम् ।	१२ वाराहम् ।	१८ ब्रह्माण्डम् ।

अत्र शैवस्य वायव्येन सह पुराणमतभेदात् पुराणत्वोपपुराणत्वाभ्यां विकल्पः। एतान्येव स्मरणार्थमन्यथा क्रमकल्पितानि।

"मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापकूस्कलिङ्गानि पुराणानि प्रचक्षते" ॥ इति।

मद्वयं भद्वयं ब्रत्रयं व चतुष्टयम् अ० ना० प० कू० स्क० लिं० ग०।
७, ५, १, ३, ८, ६, २, १५, १३, ११, १७
१६, ९ १० १२
१८ १४

४ (मतभेदेन)

कूर्म्मपुराणे तु भविष्यस्य षष्ठत्वं वायुपुराणस्य चाष्टादशत्व मुक्तं, ब्रह्माण्डपुराणंतु तत्र नोल्लिखितम् ॥

॥ इति संक्षिप्तपुराणावतारः ॥



* अथ प्रकारान्तरेण पुराणावतारः *

कृष्णद्वैपायनः पुरा एकामेव पुराणसंहिताम् "आख्यानोपाख्यान[1] गाथा[2] कल्पशुद्धि[3]: रूप[4] विषय चतुष्टयोपेतामनिर्दिष्टनाम्नीमकरोत्—लोमहर्षणाय सूतवंश्याय वेदाधिकाररहिताय स्वशिष्याय पाठयामास च ।

ततो लोमहर्षणोऽपि त्रय्यारुण्यादिभ्यः षड्भ्यः शिष्येभ्यः पाठयामास । अपरामेकां लौमहर्षणिका नाम्नीं संहितां चकार च ॥ ततस्तेषु षट्सु शिष्येषु मध्ये त्रयः शिष्याः शंशपायन[1]: सावर्णि[2]: काश्यप[3]: अपि प्रत्येकमेकैकां संहितामकुर्वन् । अपाठयंश्च हि स्वशिष्येभ्यः ।

("प्रथमं व्यासः षट् संहिताः कृत्वा" इति श्रीधरोक्तं वेदव्यासस्य षट्संहिताकर्तृत्वं तु स्वव्याख्येयश्लोकतात्पर्यार्थापरिज्ञानमूलकम् । अष्टादशस्वपि पुराणेषु कुत्रापि षट् संख्याया अनुपलब्धेस्तस्या प्रमाणत्वात् । षड्भ्यः शिष्येभ्यः एकैकामिति पदान्वय भ्रममूलकत्वाच्च । वस्तुतस्तु एतेषां शिष्योऽहं एकैकां कृत्वा सर्वाः समधीतवानित्यर्थः—यद्वा एकैकां संहितामुद्दिश्य एतेषां षण्णां शिष्योऽहं सर्वाः समधीतवानित्यर्थः सङ्गमनीयः ।)

उग्रश्रवास्तु अकृतव्रण सावर्णि काश्यपैः सह मूलसंहितां लौमहर्षणिकां लोमहर्षणात् स्वपितुरेवाधीतवान् —ततोऽकृतव्रणादिभिः कृताः संहिता तिस्रः षड्वा अकृतव्रणादिभ्यः एव प्रत्येकमधीतवान् ।

यदितु श्रीधरोक्तरीत्या व्यासप्रणीताः षण्मूलसंहिताः स्युः ताश्च प्रत्येकमेकैकां त्रय्यारुण्यादयः षडपि मुनयोऽधीतवन्तः स्युः । तेभ्यः एव च षड्भ्यो मुनिभ्यः एकैकामुग्रश्रवास्ता मूलसंहिताः पठेत् । तर्हि उपरिनिर्दिष्ट भागवतस्थ षष्ठश्लोको विरुद्धयेत् । तस्मादत्र श्रीधरोक्तमशुद्धम् । इदं तु बोध्यम्—एतस्मिन्नुपरिनिर्दिष्ट भागवतोक्त षष्ठश्लोके "चत्वारोमूलसंहिताः" इति बहुवचनदर्शनात् व्यासकृता लोमहर्षणकृता वा संहिता अनेका नत्वेकैका इति तावत्प्रतीयते । अन्यथा "मूलसंहिताम्" इति मूलसंहते इति वा वदेत् । परन्तु संख्यानियमः कर्तुमशक्य एव । विष्णुपुराणादिरीत्या तु एकैव संहिता व्यासकृता एकैव च लोमहर्षणकृता इति स्पष्टं प्रतीयते । अत्रत्यं तत्त्वं पुराणान्तरवचनान्वेषणया निश्चिन्वन्तु विपश्चितः ।

व्यासकृता पुराणसंहिता चतुर्लक्षणोपेता—आख्यानैश्चोपुपाख्यानैरित्युक्तेः । लोमहर्षणकृता मूलसंहिता तु पञ्चलक्षणोपेता—

"सर्गश्च प्रतिसर्गश्च वंशोमन्वन्तराणि च ।
वंश्यानुचरितं चैव पुराणं पञ्चलक्षणमित्युक्तं:" ॥

ऋग्यारुण्यादिकृताः षट्संहितास्तु पञ्चलक्षणोपेता व्यभिचरित लक्षणाश्च पराास्त्विदानीन्तनाः पुराणसंहिता दशलक्षणोपेताः पञ्चलक्षणोपेता अनियत लक्षणा वा ।

"दशाभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।
केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया" ॥ १ ॥
(भा० १२ स्कं० ७ अ० ६ श्लो०)

दश लक्षणानि तु भागवतद्वादशस्कन्धे सप्तमाध्याये तथा ब्रह्मवैवर्ते कृष्णजन्मखण्डे १३२ अध्याये द्रष्टव्यानि ।

मदन्वये च ये सूताः सम्भूता वेद वर्जिताः ।
तेषां पुराण वक्तृत्वं वृत्तिरासीदजाज्ञया ॥१॥ (कू.पु.१२अ.२८श्लो.३६)

आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः ।
पुराण संहितां चक्रे पुराणार्थ विशारदः ॥ १ ॥
प्रख्यातो व्यासशिष्योऽभूत सूतो वै लोमहर्षणः ।
पुराण संहितां तस्मै ददौ व्यासो महामुनिः ॥ २ ॥
सुमतिश्चाग्निवर्चाश्च मित्रायुः शांशपायनः ।
अकृत व्रणोऽथ सावर्णिः षट्शिष्यास्तस्य चाभवन् ॥ ३ ॥
काश्यपः संहिता कर्ता सावर्णिः शांशपायनः ।
लोमहर्षणिका चान्या तिसृणां मूलसंहिता ॥ ४ ॥

(काश्यप संहिता—सावर्णि संहिता—शांशपायन संहितानां मूलभूता संहिता लोमहर्षण कृता । वि०पु० ३ अंशे, ६ अध्याये १६—१६ श्लोकं) । प्रथमं व्यासः षट् संहिताः कृत्वा मत्पित्रे रोमहर्षणाय प्रादात् तस्य च मुखादेते त्रय्यारुण्यादयः एकैकां संहितामधीयन्त । एतेषां षण्णां शिष्योऽहं (उग्रश्रवाः सूतः) ताः सर्वाः समधीतवान् ॥
(भाग० १२ स्कं०, ७ अध्याय ५ श्लोक टीका श्रीधरः ।)

सुमतिः अग्निवर्चाः
त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः ।
शिंशपायन हारीतौ षड् वै पौराणिका इमे ॥ ४ ॥
अधीयन्त व्यासशिष्यात् संहितां मत्पितुर्मुखात् ।
एकैकामहमेतेषां शिष्यः सर्वाः समध्यगाम् ॥ ५ ॥
काश्यपोऽहं च सावर्णिः रामशिष्योऽकृतव्रणः ।
अधीमहि व्यासशिष्याच्चत्वारो मूलसंहिताः ॥ ६ ॥

(भाग १२ स्कं० ७ अ० ४-६ श्लो०)

प्राप्यव्यासात् पुराणादि सूतो वै लोमहर्षणः ।
सुमतिश्चाग्निवर्चाश्च मित्रायुः शांशपायनः ॥
कृतव्रणोऽथ सावर्णिः षट् शिष्यास्तस्य चाभवन् ।
शांशपायनादयश्चक्रुः पुराणानां तु संहिताः ॥

(अग्निपुराणम्)

॥ इतिप्रकारान्तरेण पुराणावतारः ॥

॥ इति पुराणनिर्म्माणाधिकरणम् ॥



॥ श्रीः ॥

❋ अथ पुराणनिर्म्माणाधिकरणम् ❋

* शुद्धि-पत्रम् *

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१	३	तयव	तयैव
,,	६	ब्राह्मण्ड	ब्रह्माण्ड
,,	८	विनिर्गंताः	विनिर्गताः
,,	१०	त्रिवर्गं	त्रिवर्ग
,,	१५	सर्वेवार्मपि	सर्वेषामपि
,,	,,	वरतु	वभ्तु
,,	१६	पूर्वं	पूर्व
,,	१६	ख्यायते	ख्यायन्ते
२	६	कत्पिनि	कल्पिनि
,,	१०	देवतानि	देवैतानि
,,	१८	यथा	यया
,,	१६	धर्म्मं	धर्म्म
,,	२१	वसिष्ट	वसिष्ठ
,,	२३	य्यचि प्रतीता	य्यचिरप्रतीता
,,	,,	ब्राह्मणद्य्	ब्राह्मणाद्यु
,,	२४	मनुवध्य	मनुवन्ध्य
,,	,,	निर्दिष्टे	निर्दिष्टे
३	२	त्वशिष्याय	स्वशिष्याय
,,	३	सग	सर्ग

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
३	४	परामेकां	पण्मेकां
,,	५	सुमति	सुमतिः
,,	८	दरायण्या	दण्यण्या
,,	,,	स्वयामासुः	श्वयामासुः
,,	१०	चान्वा	चान्या
,,	,,	कल्पे	कल्पे
,,	१३	वृहितानि	वृंहितानि
,,	१६	श्रुद्धिभिः	शुद्धिभिः
,,	१८	सूतौ	सूतो
,,	२०	मित्रायुः	मत्रयुः
,,	२१	सावर्णिः	सावर्णिः
,,	,,	चाभवत्	चाभवन्
,,	२२	कश्यपः	काश्यपः
,,	२३	लौमहर्षणि	रोमहर्षणि
४	६	द्वादशां	द्वादशं
,,	,,	रकान्दं	स्कान्दं
,,	,,	चात्रयो	चात्रत्रयो
,,	८	ब्रह्माणं	ब्रह्माण्डं
,,	१२	वसंज्ञं	वंसंज्ञं

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
५	८	पैलात्मक	सुमन्त्वात्मक
,,	१०	संहिताय।:	संहिताया
,,	२३	आसीद	आसीद्
,,	२४	चातुर्होत्र	चातुर्होत्र
६	१२	सताम	सत्ताम
,,	१४	नामापि	नामपि
७	२	एतानि	एतानि
,,	६	समासीन	समासीनं
,,	८	परवणा	परवणा
,,	१०	मूग्धो	मुग्धो
,,	१२	बभूवुर्न	बभूवुर्न
,,	१७	दत्तं	दत्त
,,	२२	सर्व	सर्व
८	४	नैकन्ततो	नैकान्ततो
,,	१४	दीर्घं	दीर्घ
१०	१६	महापद्मम	महापद्मसु
,,	२०	प्राथमिके:	प्राथमिके
,,	,,	कथन	कथनं
,,	२५	श्रावयितं	श्रावयितुं
११	२६	श्रवसेस्वर्ग	श्रवसंस्वर्ग
१२	११	इत्युक्त्या	इत्युक्त तया
१४	११	पाद्मसदितो	पाद्मसादितो
,,	१२	तत्रव	तत्रैव
१६	८	श्लोकैर्यष्म	श्लोकैर्यूष्म
१७	२	विश्रषु	विश्रुषु
,,	३	प्रहणा	प्रहणौ
,,	४	लोम	लौम
,,	५	पुराणनामु	पुराणानामु

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१७	६	श्र मद्भागवतेन	श्रीमद्भागवतेन
,,	११	तस्मै	तस्मैः
,,	१६	कर्तृ ननानि	कर्तृनानानि
१८	११	शास्त्रं	शाश्वं

अथ वेदपुराणादि शास्त्रावतारे

वेदशाखोत्पत्तिक्रमः

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
१६	७	विवत्व	विधत्व
,,	१०	यजुर्वेद स्तं	यजुर्वेदस्तं
२०	५	औदगात्रो	औद्गात्रो
,,	६	र्वणिक्रम	र्वणिकक्रम
,,	७	कर्त्तव्ये	कर्त्तव्ये
,,	१४	वेदयानाम्ना	वेदनाम्ना
,,	,,	शिश्य	शिष्य
,,	१६	पलम्	पैलम्
,,	२७	गोंखलु	गोखलु
२१	१	हित	संहिता
,,	२	हित	संहिता
,,	३	पूणि	पूर्णि
,,	२४	राजपुत्रो	रातपुत्रो
,,	२५	मुयिगणै:	मुनिगणैः
२२	४	मतकृते	मत्कृते
,,	६	र्भागवन्	र्भगवन्
,,	१४	इत्युक्त्वा	इत्युक्ता
,,	१६	चारकाध्व	चरकाध्व

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२२	१८	सूर्य्यं	सूर्य्ये
,,	२१	यजंषि	यजूंषि
,,	२३	अधीयाना	अधीयानाः
२३	३	पुर णानां	पुराणानां
,,	६	एकधिक	एकाधिक
,,	२३	कृत्वा सैन्धवा	कृत्वा बभ्रवोसैन्धवा
२४	१	बभ्रोरेव	बभ्रोरेव

अथ पुराणावतारः ।

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२५	२	प्युख्यानै	प्युपाख्यानं
,,	३	संहिता	संहितां
,,	४	संहिता	संहितां
,,	६	नाम्नाऽपि	नाम्नापि
,,	७	षट सु	षटसु
,,	८	कश्यप	काश्यप
,,	१६	ब्रह्मपुराण	ब्राह्मपुराण
,,	१७	भविंत्त्व	भावित्त्व
,,	१८	मुक्तप्रयिम्	मुक्तप्रायम्

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२६	१	बस्तुतस्तु	वस्तुतस्तु
,,	,,	प्रस्ताविका	प्रस्तावका
,,	३	लोमहषण	लोमहर्षण
,,	८	प्रस्त वक	प्रस्तावक
,,	१२०	वेदोद्धतायां	वेदोद्धृतायां
,,	१३	तत्त मुनि	तत्तन्मुनि
,,	१६	चैवं	चैव
२७	५	अ०ना०प०कू०स्क० लिं०ग०	अनापकूस्क लिंग
,,	१०	मुक्तं	युक्तं

अथ प्रकारान्तरेण पुराणावतारः ।

पृष्ठ	पंक्ति	अशुद्ध	शुद्ध
२८	२	कृष्णाद्वयायनः	कृष्णद्वैपायनः
,,	१३	संहिता	संहिताः
,,	१६	तेभ्यः	तेभ्य
,,	२०	सं हते	संहिते
२९	३	ऋया	त्रय्या
,,	५	णौर्युक्तं	णैर्य्युक्तं

॥ इति पुराणनिर्म्माणाधिकरणस्य शुद्धिपत्रम् ॥

मुद्रकः—
दी प्रिण्टर्स एण्ड पब्लिशर्स लिमिटेड,
किशनपोल बाजार, जयपुर।